# Mahalakshmi Dandakah

# મહાલક્ષ્મીદણ્ડકઃ

## Document Information

Text title : Mahalakshmi Dandakah

File name : mahAlakShmIdaNDakaH.itx

Category : devii, daNDaka, lakShmI

Location : doc_devii

Author : keshavasUri

Proofread by : Rajesh Thyagarajan

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 14, 2024

*sanskritdocuments.org*

# મહાલક્ષ્મીદણ્ડકઃ

મન્દારમાલાઞ્ચિતકેશભારાં મન્દાકિનીનિર્ઝરગૌરહારામ્ ।
વૃન્દારિકાવન્દિતકીર્તિપારાં વન્દામહે માં કૃતસદ્વિહારામ્ ॥ ૧॥

જય દુગ્ધાબ્ધિતનયે જય નારાયણપ્રિયે ।
જય હૈરણ્યવલયે જય વેલાપુરાશ્રયે ॥ ૨॥

જય જય જનયિત્રિ વેલાપુરાભ્યન્તરપ્રસ્ફુરત્સ્ફાર-
સૌધાઞ્ચિતોદારસાલાન્તરાગારખેલન્મુરારાતિપાર્શ્વસ્થિતે ।
ક્લૃપ્તવિશ્વસ્થિતે ।
ચિત્રરત્નજ્વલદ્રત્નસાનૂપમપ્રત્નસૌવર્ણ
કોટીરકાન્તિચ્છટાચિત્રિતાચ્છામ્બરે । દેવિ દિવ્યામ્બરે ।
ફુલ્લસન્મલ્લિકામાલિકાપ્રોલ્લસન્નીલભોગીશભોગપ્રતીકાશ-
વેણ્યર્ધચન્દ્રાલિકે । વલ્ગુનીલાલકે । કેશસૌરભ્યલોભ-
ભ્રમત્સ્થૂલજમ્બૂફલાભાલિમાલાસમાકર્ષણેહોત્પતન્મૌલિ-
વૈડૂર્યસન્દર્શ નત્રસ્તલીલાશુકાલોકજાતસ્મિતે । દેવજાતસ્તુતે ।
ઈશ્વરીશેખરીભૂતસોમસ્મયોત્સાદનાભ્યુત્સુકત્વચ્છિરઃસંશ્રિત-
પ્રાપ્તનિત્યોદયબ્રધ્નશઙ્કાકરસ્વર્ણકોટીરસન્દર્શનાનન્દિતસ્વીય-
તાતાઙ્કારોહણાભીપ્સુલબ્ધાન્તિકાર્કાત્મ-
જાનિર્ઝરાશઙ્કનીયાન્તકસ્તૂરિકાચિત્રકે । વાર્ધિરાટ્પુત્રિકે ।
માન્મથશ્યામલેક્ષ્વાત્મધન્વાકૃતિસ્નિગ્ધમુગ્ધાદ્ભુત-
ભ્રૂલતા ચાલનારબ્ધલોકાલિનિર્માણરક્ષિણ્યસંહારલીલેડમલે ।
સર્વદે કોમલે । સ્વપ્રભાન્યક્કૃતે સ્વાનુગશ્રુત્યધઃકારિણીકાન્તિ-
નીલોત્પલે બાધિતું વાગતાભ્યાં શ્રવઃસન્નિધિં લોચનાભ્યાં
ભૃશં ભૂષિતે । મઞ્જુસમ્ભાષિતે । કિઞ્ચિદુદ્બુદ્ધચામ્પેય-
પુષ્પપ્રતીકાશનાસાસ્થિતસ્થૂલમુક્તાફલે ।
દત્તભક્તૌઘવાઞ્છાફલે । શોણબિમ્બપ્રવાલાધરદ્યોતવિદ્યોત-
માનોલ્લસદ્દાડિમીબીજરાજિપ્રતીકાશદન્તાવલે ।

ગત્યધઃ ક્લૃપ્તદન્તાવલે ।
ત્વત્પતિપ્રેરિતત્વષ્ટસૃષ્ટાદ્ભુતાતીદ્ધભસ્માસુરત્રસ્ત
દુર્ગાશિવત્રાણસન્તુષ્ટતદ્દત્તશીતાંશુરેખાયુગાત્મત્વસમ્ભાવના-
યોગ્યમુક્તામયપ્રોલ્લસત્કુણ્ડલે । પાલિતાખણ્ડલે ॥ ૧॥

અયિ સુરુચિરનવ્યદૂર્વાદલભ્રાન્તિનિષ્પાદકપ્રોલ્લસત્કણ્ઠ-
ભૂષાનિબદ્ધાયતાનર્ઘ્યગારુત્મતાંશુપ્રજાપાત્યસારઙ્ગ-
નારીસ્થિરસ્થાપકાશ્ચર્યકૃદ્દિવ્યમાધુર્યગીતોજ્જ્વલે । મઞ્જુમુક્તાવલે ।
અઙ્ગદપ્રોતદેવેન્દ્રનીલોપલત્વિટ્છટાશ્યામલીભૂતચોલોજ્જ્વલસ્થૂલ-
હેમાર્ગલાકારદોર્વલ્લિકે । ફુલ્લસન્મલ્લિકે । ઊર્મિકાસઞ્ચયસ્યૂત
શોણોપલશ્રીપ્રવૃદ્ધારુણચ્છાયમૃદ્વઙ્ગુલીપલ્લવે ।
લાલિતાનન્દકૃત્સલ્લવે । દિવ્યરેખાઙ્કુશામ્ભોજચક્રધ્વ-
જાદ્યઙ્કુરાજત્કરે । સમ્પદેકાકરે ।
કઙ્કણશ્રેણિકાબદ્ધરત્નપ્રભાજાલચિત્રીભવત્પદ્મયુગ્મ-
સ્ફુરત્પઞ્ચશાખદ્વયે । ગૂઢપુણ્યાશયે । મત્પદાબ્જોપકણ્ઠે
ચતુઃપૂરુષાર્થા વસન્ત્યત્ર મામાશ્રયં કુર્વતે તાન્ પ્રદાસ્યામિ
દાસાય ચેત્યર્થકં ત્વન્મનોનિષ્ઠભાવં જગન્મઙ્ગલં સૂચયદ્ વા
વરાભીતિમુદ્રાદ્વયા વ્યઞ્જયસ્યઙ્ગપાણિદ્વયેનામ્બિકે । પદ્મપત્રામ્બકે ।
ચારુગમ્ભીરકન્દર્પકેલ્યર્થનાભીસરસ્તીરસૌવર્ણ-
સોપાનરેખાગતોત્તુઙ્ગવક્ષોજનામાઙ્કિતસ્વર્ણશૈલ-
દ્વયારોહણાર્થેન્દ્રનીલોપલાબદ્ધસૂક્ષ્માધ્વ-
સમ્ભાવનાયોગ્યસદ્રોમરાજ્યાઢ્યદેહે રમે । કા ગતિઃ શ્રીરમે ।
નિષ્કનક્ષત્રમાલાસદૃક્ષાભનક્ષત્રમાલાપ્રવાલસ્રગેકાવલી-
મુખ્યભૂષાવિશેષપ્રભાચિત્રિતાચ્છોત્તરાસઙ્ગસઞ્છિન્નવક્ષોરુહે
। ચઞ્ચલાગૌરિ હે ।
કેલિકાલક્વણત્કિઙ્કિણીશ્રેણિકાયુક્તસૌવર્ણકાઞ્ચીનિબદ્ધ-
સ્ફુરત્સ્પષ્ટનીવ્યાઢ્યશુક્લામ્બરે । ભાસિતાશામ્બરે ।
પુણ્ડરીકાક્ષવક્ષઃસ્થલીચર્ચિતાનર્ઘ્યપાટીરપઙ્કાઙ્કિતાનઙ્ગ-
નિક્ષેપકુમ્ભસ્તને । પ્રસ્ફુરદ્ગોસ્તને ॥ ૨॥

ગુરુનિબિડનિતમ્બબિમ્બાકૃતિદ્રાવિતાશીતરુક્સ્યન્દનપ્રોતચન્દ્રાવલે-
પોત્કરે । સ્વર્ણવિદ્યુત્કરે । ભોઃ પ્રયચ્છામિ તે ચિત્રરત્નોર્મિકાં
મામિકાં સાદરાદેહ્યદો મધ્યમં ભૂષયાદ્યૈતયા દ્રષ્ટુમિચ્છામ્યહં

સાધ્વિતિ ત્વત્પતિપ્રેરિતાયાં મુદા પાણિનાદાય ધૃત્વા રહઃ
કેશવં લીલયાનન્દયઃ સપ્તકીવાસ્તિ તે । સપ્તલોકીસ્તુતે ।
ચિત્રરોચિર્મહામેખલામણ્ડિતાનન્તરત્નસ્ફુરત્તોરણાલઙ્કૃત-
શ્લક્ષ્ણકન્દર્પકાન્તારરમ્ભાતરુદ્વન્દ્વસમ્ભાવનીયોરુયુગ્મે રમે ।
સમ્પદં દેહિ મે । પદ્મરાગોપલાદર્શબિમ્બપ્રભાચ્છાયસુસ્નિગ્ધજાનુ
.... દ્વયે શોભને ચન્દ્રબિમ્બાનને ।
શમ્બરારાતિજૈત્રપ્રયાણોત્સવારમ્ભજૃમ્ભન્મહા-
કાહલીડમ્બરસ્વર્ણતૂણીરજઙ્ઘે શુભે । શારદાર્કપ્રમે ।
હંસરાજક્વણદ્ધંસબિમ્બસ્ફુરદ્ધંસકાલઙ્કૃતસ્પષ્ટ-
લેખાઙ્કુશામ્ભોજચક્રધ્વજ-વ્યઞ્જનાલઙ્કૃતશ્રીપદે ।
ત્વાં ભજે સમ્પદે । નમ્રવૃન્દારિકાશેખરીભૂતસૌવર્ણ-
કોટીરરત્નાવલીદીપિકારાજિનીરાજિતોત્તુઙ્ગગાઙ્ગેય-
સિંહાસનાસ્તીર્ણસૌવર્ણબિન્દ્વઙ્કસૌરભ્યસમ્પન્નતલ્પસ્થિતે ।
સન્તતસ્વઃસ્થિતે । ચેટિકાદત્તકર્પૂરખણ્ડાન્વિતશ્વેતવીટીદરાદાન-
લીલાચલદ્દોર્લતે । દૈવતૈરર્ચિતે । રત્નતાટઙ્કકેયૂરહારાવલી-
મુખ્યભૂષાચ્છટારઞ્જિતાનેકદાસીસભાવેષ્ટિતે । દેવતાભિષ્ટુતે ।
પાર્શ્વયુગ્મોલ્લસચ્ચામરગ્રાહિણીપઞ્ચશાખામ્બુજાધૂત-
જૃમ્ભદ્ક્વણત્કઙ્કણાભિષ્ટુતાભીશુસચ્ચામરાભ્યાં મુદા ચીજ્યસે ।
કર્મઠૈરિજ્યસે । મઞ્જુમઞ્જીરકાઞ્ચ્યુર્મિકાકઙ્કણશ્રેણિ-
કેયૂરહારાવલી- કુણ્ડલીમૌલિનાસામણિદ્યોતિતે । ભક્તસઞ્જીવિતે ॥ ૩॥

જલધરગતશીતવાતાર્દિતા ચારુનીરન્ધ્રદેવાલયાન્તર્ગતા વિદ્યુદેષા
હિ કિં ભૂતલેઽપિ સ્વમાહાત્મ્યસન્દર્શનાર્થં ક્ષમામાસ્થિતા
કલ્પવલ્યેવ કિં ઘસ્રમાત્રોલ્લસન્તં રવિં રાત્રિમાત્રોલ્લસન્તં વિધું
સંવિધાય સ્વતો વેધસાતુષ્ટચિત્તેન સૃષ્ટા સદાપ્યુલ્લસન્તી
મહાદિવ્યતેજોમયી દિવ્યપાઞ્ચાલિકા વેતિ સદ્ભિઃ સદા તવર્યસે । ત્વાં
ભજે મે ભવ શ્રેયસે । પૂર્વકદ્વારનિષ્ઠેન નૃત્યદ્વરાકારરમ્ભા-
દિવારાઙ્ગનાશ્રેણિગીતામૃતાકર્ણનાયત્ત-
ચિત્તામરારાધિતેનોચ્ચકૈર્ભાર્ગવીન્દ્રેણ સમ્ભાવિતે । નો સમા
દેવતા દેવિ તે । દક્ષિણદ્વારનિષ્ઠેન સચ્ચિત્રગુપ્તાદિયુક્તેન
વૈવસ્વતેનાર્ચ્યસે । યોગિભિર્ભાવ્યસે । પશ્ચિમદ્વારભાજા ભૃશં
પાશિના સ્વર્ણદી- મુખ્યનદ્યન્વિતેનેડ્યસે । સાદરં પૂજ્યસે ।

ઉત્તરદ્વારનિષ્ઠેન યક્ષોત્તમૈર્નમ્રકોટીરજૂટૈર્મનોહારિભી
રાજરાજેન ભક્તેન સમ્ભાવ્યસે । યોગિભિઃ પૂજ્યસે । લક્ષ્મિ
પદ્માલયે ભાર્ગવિ શ્રીરમે લોકમાતઃ સમુદ્રેશકન્યેઽચ્યુતપ્રેયસિ
.... । સ્વર્ણશોભે ચ મે ચેન્દિરે વિષ્ણુવક્ષઃ સ્થિતે
પાહિ પાહીતિ યઃ પ્રાતરુત્થાય ભક્ત્યા યુતો નૌતિ સોઽયં નરઃ
સમ્પદં પ્રાપ્ય વિદ્યોતતે । ભૂષણદ્યોતિતે । દિવ્ય
કારુણ્યદૃષ્ટ્યાશુ માં પશ્ય મે દિવ્યકારુણ્યદૃષ્ટ્યાશુ
માં પશ્ય મે દિવ્યકારુણ્યદૃષ્ટ્યાશુ માં પશ્ય મે । માં કિમર્થં
સદોપેક્ષસે નેક્ષસે ત્વત્પદાબ્જં વિના નાસ્તિ મેઽન્યા ગતિઃ સમ્પદં દેહિ
મે સમ્પદં દેહિ મે સમ્પદં દેહિ મે । ત્વત્પદાબ્જં પ્રપન્નોઽસ્મ્યહં
સર્વદા ત્વં પ્રસન્ના સતી પાહિ માં પાહિ માં પાહિ માં પદ્મહસ્તે
ત્રિલોકેશ્વરિં પ્રાર્થયે ત્વામહં દેવિ તુભ્યં નમો દેવિ તુભ્યં નમો
દેવિ તુભ્યં નમઃ ॥ સત્રિષષ્ટ્યુત્તરશતરગણાઢ્યશ્ચતુર્દલઃ ।
મહાલક્ષ્મીદણ્ડકોઽયં કૃતઃ કેશવસૂરિણા ॥

ઇતિ કેશવસૂરિકૃતઃ મહાલક્ષ્મીદણ્ડકઃ સમ્પૂર્ણઃ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૮૫)

The Mahalakshmidandaka (85) of Keshavasuri, who seems to be identical with Kesavadesika mentioned in the Sadananadandaka 3 by Ramanujadesika, is on the model of the well-known Shyamaladandaka. It is composed of 163 ra-gaNa-s (two long syllables with a short one in between) and is divided into four sections.

Proofread by Rajesh Thyagarajan

*Mahalakshmi Dandakah*

pdf was typeset on April 14, 2024

Please send corrections to *sanskrit@cheerful.com*